## श्रवणाभ्यासः

वाचनम् ⟶ श्रवणम् ⟶ अनुवाचनम् ⟶ अवबोधनम्

• **कृतिः –** शिक्षकः कथां पठति । छात्राः अनुपठन्ति । शिक्षकः अपरिचितशब्दानाम् अर्थं वदति ।

### शठं प्रति शाठ्यम् ।

**बकस्य शृगालस्य च मित्रता अस्ति । एकदा शृगालः बकं भोजनार्थं स्वगृहम् आह्वयति । शृगालः स्थालिकायां पायसं परिवेषयति । बकस्य चञ्चुः दीर्घा अस्ति । स्थालिकायां परिवेषितं पायसं बकः खादितुं न शक्नोति । शृगालः तस्य उपहासं करोति । पुनः कदाचित् बकः शृगालं भोजनार्थं स्वगृहम् आह्वयति। तदा सः गलन्तिकायां पायसं परिवेषयति। गलन्तिकायां परिवेषितं पायसं शृगालः खादितुं न शक्नोति । बकः तस्य उपहासं करोति । शृगालः अवगच्छति– ''मम पूर्वकृतस्य एतत् फलम्'' इति। सः मित्रस्य क्षमां प्रार्थयते । तयोः मैत्री दृढा भवति।**



• **कृतिः–** शिक्षकः कथां कथयति । छात्राः शृण्वन्ति, अवगच्छन्ति, माध्यमभाषया पुनः वदन्ति ।

### सत्यप्रियः काष्ठिकः ।



**एकः काष्ठिकः काष्ठच्छेदनार्थं वनं गच्छति । अनवधानात् तस्य हस्तात् कुठारः जले पतति । सः चिन्ताकुलः भवति । तदा तत्र देवः आगच्छति। देवः जले मज्जति । सुवर्णकुठारं गृहीत्वा बहिः आगच्छति। सः वदति, ''अपि एषः तव कुठारः?'' काष्ठिकः वदति– ''न एषः मम कुठारः ।'' तदनन्तरं देवः रौप्यकुठारं दर्शयति। काष्ठिकः तदपि न स्वीकरोति । अन्ते देवः लोहकुठारम् आनयति । काष्ठिकः वदति, ''आम्, एषः एव मम कुठारः ।'' प्रसन्नः देवः तस्मै सर्वान् कुठारान् यच्छति । अहो काष्ठिकस्य निःस्पृहता सत्यप्रियता च !**